शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता शासन संमता विश्वप्रिया पाक्षिक-



शारदा

संपादकः पं.वसन्त अ. गाडगीळ.

वार्षिकं मूल्यम् रू. २५ * अस्य अङ्कस्य रू. १-२५

भारतीय-सौर-दिनाङ्कः ९ पौष १९०६ वर्षम् २६ :अङ्क ८
विक्रम-संवत् २०४१ रविवासरः दिनांक ३०.१२.१९८४
पुणे-डेरवण (चिपळूण) यज्ञ-महोत्सव-विशेषाङ्क- दैनिकम् ६

अद्य रविवासरे ३०.१२.८४ प्रातः ४
निर्वाचन-निर्णये पक्ष-बलम्

संसदः स्थान-संख्या	५१६
उद्घोषित-निर्णय-संख्या	४८०
इन्दिरा काँग्रेस	३८५
तेलगू देशम्	२८
जनता	१०
कम्युनिस्ट (मार्कसिस्ट)	१७
काङ्ग्रेस (शरद)	४
अण्णाद्रविडमुकळघम्	१२
भारतीय जनता पक्ष	२
काँग्रेस (जे)	१
इतरे	१२

तस्माद् अध्येया पूर्वमीमांसा

परमकारुणिकेन जैमिनिना वेदार्थ-प्रकाशनार्थं द्वादशाध्यायात्मकं मीमांसा-शास्त्रं प्रणीतम्। तत्र आद्यं सूत्र-द्वयं विद्यते 'अथातो धर्म-जिज्ञासा।' चोदना-लक्षणोर्थो धर्मः इति। वेदाध्ययनानन्तरं धर्मः अपि जिज्ञासितव्यः। तत्र 'कः धर्मः?' इति, प्रतिपादितं द्वितीयेन सूत्रेण। वेदप्रतिपाद्यः प्रयोजनवदर्थः धर्मः। इष्ट-प्राप्तिः अनिष्ट-निवृत्तिः वेद-प्रतिपादित-कर्मानुष्ठानाद् भवति। अतः एव

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्।
तेनेशस्य विधीयताम् अपचितिः काम्ये मतिस्त्यजताम्।।

इति भगवत्-पूज्यपादैः श्रीमद्आद्यशंकराचार्यैः उपदिष्टम्। (अपचितिः नाम पूजनम्) तत् कर्म साङ्गोपाङ्गम् अनुष्ठेयम्। प्रयोगकालीन-अर्थ-बोधनार्थं मंत्राणाम् उपयोगः भवति। मंत्रैः एव कर्मानुष्ठानं कर्तव्यम् इति मंत्रोच्चारणे प्राधान्यं प्रतिपादितम्। तत्र अङ्गानुष्ठानाद् अपूर्वं कल्पिततम्। तेषां साहित्येन महापूर्वम् उत्पद्यते। महापूर्वं फलजनकं भवति। तत्र 'कानि अङ्गानि किं प्रधानम्?' इति विमर्शार्थं शेष-शेषि-भाव इति प्रकरणे सप्रपञ्चं निरूपितम् अस्ति। अपूर्व-विधिः, नियम-विधिः, परिसंख्या-विधिः, उत्पत्ति-विधिः इत्येतेषाम् अपि सुविस्तरं विचारः कृतः। तेन कर्मानुष्ठानं साङ्गोपाङ्गम् फलाय कल्पयते। एतत् सर्वं वेदाभ्यासकैः नैव ज्ञातं चेत् स्वाध्यायस्य अपूर्णता भवति। कर्तव्यस्य कर्मणः प्रयोजनम् अज्ञातं भवति।

तस्माद् अध्येया मीमांसा।

मधली ओळ, नासिक — पं.लक्ष्मीकांत दीक्षित

अभिनन्दनीयः सर्वोपकारकः धर्मोत्सवः।

(पं.लक्ष्मीकांत दीक्षित, नासिक)

भगवान् जगतः स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रवृत्तिं-लक्षणं धर्मं सनक-सनन्दनादीन् सृष्ट्वा निवृत्ति-लक्षणं धर्मं ग्राहयामास वेदोक्तम्। द्विविधो धर्मः। प्रवृत्ति-लक्षणः निवृत्ति-लक्षणः च। तत्र प्रवृत्ति-लक्षण-धर्माचरणार्थं ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यास-रूपाणां चतुर्णाम् आश्रमाणां व्यवस्था प्रतिपादिता। गार्हस्थ्याश्रमः त्रयाणाम् आश्रमाणाम् आधारः। चतुर्विधेषु पुरुषार्थेषु मोक्षः एव परम-पुरुषार्थः संपादनीयः। तदर्थं प्रथमे आश्रमे वेदाध्ययनम् अग्निकार्यं गुरुसेवा च अवश्यं प्रतिपादिता। अग्नेः सकाशात् दीर्घायुष्यं, तेजस्विता, मेधाभिवृद्धिः इति सर्वम् अभिलषति 'ब्रह्मचारी'। गृहस्थाश्रमे नित्य-नैमित्तिक-काम्य कर्मानुष्ठानेन चित्तशुद्धिः, पुत्रान् अनृणान् कृत्वा तेभ्यः कांचिद्वृत्तिं विधाय सर्वाः कन्याः विवाहेन स्थाने परिकल्प्य वनं व्रजेत्। तत्र वेदान्तः गुरुः ईश्वरः इत्येतेषां सेवनं कृत्वा मनो मोक्षे नियोजयेत्। एतादृशस्य जीवनादर्शस्य प्रबोधनं वैदिक-सनातन-धर्म-मार्ग-प्रदर्शिनी-यज्ञ-संस्था कारयति। अत एव डेरवण-ग्रामे संयोजितस्य विराट् यज्ञमहोत्सवस्य महत्त्वम् असाधारणम्। सर्वैः सादरम् अभिनन्दयते कलिकाले सांप्रतिके दुर्लभ-दर्शनस्य एतस्य धर्म-महोत्सवस्य प्रेरकः मार्गदर्शकः सर्वस्वरूपः पू. श्रीदिगम्बरदासमहाराजः। इति शम्।

।। स्त्री, वीरकन्या, वीरपत्नी, वीरजननी भवतु।।

डेरवण (चिपळूण-महाराष्ट्र) :"भारतीय स्त्री रामायण-कथानुसारम् आदर्शोत्तमा वीरकन्या, वीरपत्नी तथा वीरमाता भवतु। भोगवादिषु विदेशेषु अयं संदेशः प्रसार्यताम्।" इति पू. दिगम्बरदासमहाराजेन मुम्बई-देववाणी-मन्दिर-निर्मितं 'बालगीतं रामचरितम्' इति नामकं संस्कृतं नृत्यनाट्यं दृष्ट्वा स्वीये शुभाशीर्वाद-भाषणे निवेदितम्। संस्कृत-नाटककार श्री. श्री. भि. वेलणकर-प्रयासाः संस्कृतस्य लोकप्रियतार्थं प्रशंसिताः सर्वाकर्षकं नृत्यनाट्यं दृष्ट्वा महत्त्या संख्यया समुपस्थितैः।

अगतिकाःस्मः। क्षन्तव्याः वयम्। कर्गज-मुद्रणसहिती-मूल्यवर्धनात् नूतने षड्विंशति (२६) - तमे (१ नोव्हेंबर १९८४) शारदीये वर्षे

शारदा-मूल्य-वर्धनम्।

मूल्यम्	भारतवर्षे रुप्यकाणि	विदेशेषु अमेरिकन $
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् २६ अङ्क ८ सौर ९ पौष १९०६ ३० डिसेंबर १९८४

वार्षिकं मूल्यम् रू. २५ ❀ अस्य अङ्कस्य रू. १-२५

स्मर्यताम् । श्रूयताम् ।। स्मर्यताम्

आ का श वा णी

डॉयशे वेले कलोन (पश्चिम जर्मनी)

प्रतिमासं द्वितीये सोमवासरे रात्रौ ९.२५ तः ९.३७

लघ्वलहरी ११७६५ , ११७९५ , १५३२० , १७८७५

विषयः जर्मनीदेशे विश्वे च सर्वत्र संस्कृत - वार्ताः

संस्कृत-कार्यक्रम-संचालिका - डॉ. याज्ञसेनी पोपट

'शारदा-दैनिक-वितरण-केन्द्रम्

राजा दीक्षित वृत्तपत्रागारम्

चिपळूण (रत्नागिरी) ४१५६०५

तस्माद् अध्येया पूर्वमीमांसा

वेद-शास्त्र-संपन्नः ब्रह्मवित् सदैव सन्माननीयः सादरं संपूजनीयः अग्र-पूजा-बहुमानेन इति धर्माज्ञा।

उच्चैर्गीतिर्जगति सिध्यति धर्मतश्चेत्।
तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।।
तेषां प्रकाशन-दशा च महीसुरैश्चेत्।
तान् अन्तरेण निपतेत् क नु मत्प्रणामः।।

इति वचनम् आदृत्य वेदार्थ-प्रकाशकः भूसुरः ब्राह्मणः सदैव अभिवादनेन बहु माननीयः इति प्रतिपादितम्। परं के कति किं नामानः ते वेदाः, कानि तत्र वेदाङ्गानि, कियन्ति सन्ति तत्र शास्त्राणि, किं कस्य शास्त्रस्य प्रयोजनम्? इति प्रश्नावली तथाकथितानां वेद- शास्त्र-संपन्न-पद-भाजां पुरतः स्थापिता चेत् तत्र बहुसंख्याः निरुत्तराः स्युः इति भीतं नो मानसं विषयम् एनं प्रपञ्चयितुम्। परं डेरवण-ग्रामे पू.दिगम्बरदासमहाराजैः 'पूर्वमीमांसा यथा अधीता भवेत्, व्याख्याता, ज्ञाता, प्रसारिता च भवेत् तथा प्रयतनम् अत्यावश्यकम् इति वारं वारं प्रतिपादितम्। तस्माद् एव संपादकीयार्थं विषयम् एनम् आश्रित्य स्वात्मा प्रकटीक्रियते।

मीमांसा-न्याय-व्याकरण-वेदान्त-ज्योतिष-छन्दःशास्त्रेषु प्रत्येकं समानेन स्तरेण महत्त्वपूर्णेषु सत्सु अपि मीमांसा-शास्त्र-ज्ञानं विना कस्य मंत्रस्य किं प्रयोजनं कश्च विनियोगः इति बोधस्य सुतराम् अशक्यत्वात् पूर्वमीमांसाभ्यासः वेद-स्वाध्याय-शीलस्य कृते अत्यावश्यकः। वेद-पदार्थं+तत्प्रयोजन-सहितम् अजानानः कैवलं भूमि-भार-भूतः स्याद् इत्यपि पूर्वाचार्यैः स्पष्टं प्रतिपादितम्।

अन्यच्च, सांप्रतिक-विकसितेन विज्ञान-शास्त्रेण साकम् अपि अध्यात्म-विद्या-मूलस्य वेदस्य काचन संगतिः साधयितुं शक्या। यदि तदुभयत्र गतिः स्यात्। अणुध्वं, परमाणुध्वं सिद्धीकृत्य जगत् नीयते विनाश-गर्तं बलाढ्य-राष्ट्र-धुरीणैः। परं परमाणु शस्त्र-सज्जैः साकं योद्धुं तान् च जेतुं कथं भवति अध्यात्म-हृदयं 'भा'रतं तदपि कठोरेण तपसा सुनिपुणं संशोध्य चिन्तनीयम्।

परम् इदं सर्वं साधनीयं चेत् केवलं निष्प्रयोजनं वेदाध्ययनम् इतःपरं यथापूर्वं नैव पर्याप्तम्। सप्रयोजनेन वेदाभ्यासेन चिन्तनेन संप्रति भाव्यम्। तत् शक्यं केवलं मीमांसाभ्यासेन।

तस्माद् अध्येया पूर्वमीमांसा।

आणि म्हणूनच मीमांसेचा अभ्यास व्हावा

वेद-शास्त्र-संपन्न ब्रह्मज्ञ नेहमी सन्मानाने गौरवावा, आदराने त्यांचे पूजन करावे, तो अग्रपूजेचा मानकरी मानावा अशी आहे धर्माची आज्ञा.

जगात सर्वोच्च गति केवळ धर्मानेच मिळत असेल,
त्या धर्माचे ज्ञान अपौरुषेय वेदवाणीनेच होत असेल
आणि ते वेद आम्हाला ब्रह्मणाकडूनच मिळत असतील
तर मग त्या ब्राह्मणाशिवाय इतर कुणाला आम्ही वंदावे?

या वचनाप्रमाणे आम्हाला वेद आणि त्यांचा अर्थ यांच्या प्रकाशात आणणारा भूदेव ब्राह्मण नेहमी नमस्कारपूर्वक सन्मानित करावा असे सांगितलेले आहे.

परन्तु आज 'वेद हे कोणते, किती, त्यांची नावे काय, वेदाङ्गे कोणती, शास्त्रे किती आहेत, कोणत्या शास्त्राचे काय प्रयोजन?' अशी प्रश्नमालिका तथाकथित वें.शा. संपन्न म्हणविणाऱ्यासमोर ठेवली तर त्यापैकी बहुतेक निरुत्तर होतील या भीतीने या विषयाचे विवरण करताना थोडा बाऊच वाटायचा, परंतु डेरवण गावात यज्ञानुष्ठान महोत्सवात पू. दिगम्बरदास महाराजानी पूर्व मीमांसा शास्त्राचा जेणेकरुन अभ्यास होईल, ती जाणली, प्रसार केली जाईल असे प्रयत्न आवश्यक आहेत असे वरचेवर सांगितले. म्हणूनच या विषयावर लेखणी चालवावी असे वाटून आजच्या या संपादकीयात मनोगत स्पष्ट करु इच्छितो.

मीमांसा-न्याय-व्याकरण-वेदान्त- ज्योतिष छन्दशास्त्रापैकी सर्वांचेच महत्व सारखे असले तरी मीमांसाशास्त्राच्या जाणकारीशिवाय कोणत्या मंत्राचे प्रयोजन काय, त्याचा विनियोग कुठे, कसा? याचा बोधच होणे शक्य नाही. म्हणूनच वेदाभ्यासिना त्याचा अभ्यास आवश्यकच आहे.

वेद मंत्रांच्या पदांचा अर्थ, प्रयोजन, विनियोगासह न जाणणारा केवळ भुईचा भार ठरतो असे आपल्या पूर्वाचार्यानी स्पष्टच सांगितले आहे.

दुसरे म्हणजे सध्याच्या विकसित विज्ञानाबरोबर अध्यात्मविद्येचे 'मूल स्थान असणाऱ्या वेदांची काही संगती असल्याचे' सिद्ध करणे शक्य आहे. जर त्या दोन्ही विषयात गती असेल. अणु बॉम्ब, हैड्रोजन बॉम्ब यासारखी भयंकर संहारक शस्त्रास्त्रे सिद्ध करुन बड्या राष्ट्रांची जग विनाशाच्या खड्यात घालण्याची तयारी आहे. परंतु अण्वस्त्र सज्ज राष्ट्राशी दोन हात करुन त्यांच्यावर मात करण्याची भारताची सिद्धता अध्यात्म 'हे' त्याचे 'हृदय असल्यामुळे' त्याच्या बळावर कशी होईल तेही कठोर तपश्चर्या आणि खोल संशोधन करुन पाहिले पाहिजे.

पण हे सर्व साधावयाचे तर निष्प्रयोजन वेदाभ्यासाने 'यापुढे' भागणार नाही. यापुढील वेदांचा स्वाध्याय हा प्रयोजन निश्चित ठरवून, चिन्तनपूर्वक झाला पाहिजे. आणि हे केवळ पूर्वमीमांसेचा अभ्यास करुनच शक्य आहे म्हणूनच पूर्व मीमांसा अभ्यासली पाहिजे.

श्रीहरिः ।

अथ श्रीनारायणकवचम् ।

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४ ॥
नारायणमयं वर्म संनह्येद् भय आगते ।
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥
मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥
करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ ७ ॥
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ ८ ॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसंधिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ॥ ९ ॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥ १० ॥

आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ११ ॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां
न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचाप-
पाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥

जलेषु मां रक्षतु मत्स्यमूर्ति-
र्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात्
त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः
पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं
दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

रक्षत्वसौ माध्वनि यज्ञकल्पः
स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे
सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥ १५ ॥

मामुग्रधर्मादखिलात् प्रमादा-
न्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः
पायाद्गुणेशः कपिलः कर्मबन्धात् ॥ १६ ॥

सनत्कुमारोऽवतु कामदेवा-
द्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात्
कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥

धन्वन्तरिर्भगवान् पात्वपथ्याद्
द्वन्द्वाद् भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद्
बलो गणात् क्रोधवशादहीन्द्रः ॥ १८ ॥

द्वैपायनो भगवानप्रबोधाद्
बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु
धर्मावनायोरुकृतावतारः ॥ १९ ॥

मां केशवो गदया प्रातरव्यात्
गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्ति-
र्मध्यंदिने विष्णुरसीन्द्रपाणिः ॥ २० ॥

देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे
निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥
श्रीवत्सधामापररात्र ईशः
प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसंध्यं प्रभाते
विश्वेश्वरो भगवान् कालमूर्तिः ॥ २२ ॥

चक्रं युगान्तानलतिग्मनेमि
भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ।
दंदग्धि दंदग्ध्यरिसैन्यमाशु
कक्षं यथा वातसखो हुताशः ॥ २३ ॥

गदेऽशनिस्पर्शनविस्फुलिङ्गे
निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षो-
भूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥

त्वं यातुधानप्रमथप्रेतमातृ-
पिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो
भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥ २५ ॥
त्वं तिग्मधारासिवरारिसैन्य-
मीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मञ्छतचन्द्र छादय
द्विषामघोनां हर पापचक्षुणाम् ॥ २६ ॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्योनृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥ २७ ॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः ॥ २८ ॥

गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वमधः समन्ता-
दन्तर्बहिर्भगवान् नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन
स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥
एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥
न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३७ ॥
इमां विद्यां पुरा कश्चित् कौशिके धारयन् द्विजः ।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८ ॥
तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥
गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ।
स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ४० ॥

श्रीशुक उवाच

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥

एतां विद्यामधिगतो विष्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥

इति नारायणकवचं सम्पूर्णम् ।

१०.१.१९८५
शारदा : २६ : ८ पञ्जीकृत क्रमाङ्कः पीएनसीडब्लयू १०७ पूर्वमूल्यं विना प्रेषा अनुज्ञा क्र. ७१ पुणे ३० पृथक्करणकार्यालये समर्पितम्

याग-महोत्सवे समुपस्थिताः विशिष्ट-विद्वांसः

: शृङ्गेरी :

मीमांसा-साहित्य-विद्वान् श्रीनरसिंहमूर्तिशास्त्री
आस्थान-पण्डितः, शृङ्गेरी-शारदा-पीठम्
कृष्णयजुर्वेदक्रमपाठी श्री. अनन्तभट्ट देवधर
ज्योतिर्विद्वान् श्री. विघ्नेश्वर सीताराम फाटक

: बेङ्गलूर :

कीर्तनाचार्य लक्ष्मणभट्ट वेलणकर
वेदमूर्तिः रामचंद्र वेङ्कटेश पाळन्दे

: धारवाड :

याज्ञिक-कोविद वासुदेवशास्त्री सुब्बणभट्ट जोशी
व्याकरण-विद्वान् कृष्णशास्त्री रङ्गभट्ट संगम
कृष्णयजुर्वेदी केशवभट्ट हरि डोङ्गरे

: होन्नावर :

श्रौत-स्मार्त-सलक्षण-सामवेद-विद्वान् वेदमूर्ती विश्वेश्वर रामभट्ट
सामवेद-विद्वान् सुब्रह्मण्य विश्वेश्वरभट्ट

: हेगडे कुमठा :

अद्वैतवेदान्त-विद्वान् जी. नारायण शर्मा

: गोकर्ण :

वेदाचार्य दिनकर बाळकृष्ण जोगळेकर
वेदाचार्य दामोदर सीताराम जोगळेकर
कृष्णयजुर्वेदघनपाठी गजानन सुब्रह्मण्य चित्तिगे
व्याकरण-विद्वान् महाबळेश्वर प. जोशी
साहित्याचार्य महाबळेश्वर दे. भडती
साहित्याचार्य नरसिंहदेवरु अडती
आचार्य गजानन शान्तारामभट्ट अंकोला
वेदकोविद फणिराज सखाराम गोपी
वेदकोविद महाबळेश्वर ना. जोशी

: वाराणसी :

अनन्तरामभट्ट पुणताम्बेकर - ऋग्वेदाचार्य
गङ्गाधर श्रीकृष्ण देव - ऋग्वेदाचार्य
कृष्णयजुर्वेद घनपाठी एस. व्ही. कृष्णमूर्तिशर्मा
घनपाठी लक्ष्मीकान्त दीक्षित
शुक्लयजुर्वेद घनपाठी विनायक मङ्गलेश्वर बादल
सामवेदाचार्यकौथुमी शरद राम त्रिपाठी
वेदाचार्य नारायणशास्त्री रटाटे
अथर्वणाचार्य हरि रामचंद्र आठवले

: नासिक :

यागाचार्य शतपथविद्वान् लक्ष्मीकान्त दीक्षित
यागाचार्य शतपथविद्वान् नारायणभट्ट भानोसे

यागानुष्ठान- महोत्सवे कार्य-विभागः।

ऋक्संहिताचार्यः -	घनपाठी दत्तभट्ट किंजवडेकरगुरुजी, पुणे
सर्वानुष्ठानाचार्यः -	लक्ष्मणभट्ट सप्रेगुरुजी, पुणे
ब्रह्मा -	ऋग्वेदसम्राट् सखारामभट्ट पाध्ये, इचलकरंजी
सदस्यः -	वेदाचार्यः दिनकरभट्टः फडके, पुणे
गाणपत्यः -	वेदमूर्तिः चिंतामणिभट्ट गुळसुंदकर, पुणे
उपद्रष्टा -	अनन्तरामपन्त पुणताम्बेकर, वाराणसी
उपाचार्यः -	घनपाठी विनायकभट्ट आठल्ये, रत्नागिरी
उपसदस्यः -	वेदमूर्तिः चिन्तामणिभट्टः पुरोहितः, पुणे
उपगाणपत्यः -	वेदाचार्यः भालचंद्रभट्टः फणसळकर, मुम्बई
उपोपद्रष्टा -	वेदाचार्यः रामचंद्रभट्टः गोरे, सोलापूर
उपाचार्याः -	वेदाचार्यः श्रीकान्त चितळे, आळंदी (पुणे)
	वेदाचार्यः बाबीकाका पाध्ये, मुम्बई
	वेदाचार्यः गणेशकृष्ण कोतवडेकर, पुणे
	वेदाचार्यः दत्तात्रेय पां. नवाथे, पुणे
	वेदाचार्यः राघवेद्राचार्यः घळसासी, कराड
	वेदाचार्यः मनोहर पराञ्जपे, मुम्बई
	वेदमूर्ती : प्रभाकर निगुडकर
	वेदमूर्ती : चिन्तामणि पंढरपुरे
सर्वनिरीक्षणाचार्यः -	'शारदा'कारः पं. वसन्त अ. गाडगीळ, पुणे

डेरवण (चिपळूण) श्रीशिव - समर्थ - मन्दिरे
यज्ञ-संस्था-रक्षकं विराट् यागानुष्ठानम् ।

(दि. २५ डिसेम्बर ८४ तः १ जानेवारी ८५)

१) अयुतचण्डी ।
२) अतिरुद्र - स्वाहाकारः ।
३) अष्टोत्तरशत - भागवत - पारायणम् एकं - दशम - स्कन्ध - हवनम् ।
४) वाल्मीकि-रामायण-पारायण-पञ्चकम् एकं सुन्दर-काण्ड-हवनम् ।
५) लघु - विष्णु - यागः । (१४४ पवमानपाठाः, १२ पाठ - हवनम् ।)
६) लघु - सौर - पाठाः (१२ पाठ - हवनम् ।)
७) लक्ष - (मोदक) गणेश - यागः ।
८) श्रीसूक्त - यागः । (दशसहस्रपाठाः, सहस्रपाठहवनम् ।)
९) श्रीदेवीसूक्तयागः । (दश-सहस्र-पाठाः, सहस्र-पाठ-हवनम् ।)

* दर्शनेच्छुभिः १ डिसेम्बर ८४ पूर्वं स्वीयं नामाङ्कनं कर्तव्यम् ।

कार्यदर्शी, श्रीशिव-समर्थ-मन्दिरम्, डेरवण(चिपळूण, रत्नागिरी)महाराष्ट्र

श्रीसन्तसीतारामबुवा वालावलकर धर्मादाय-न्यासः

विट्ठलराव जोशी धर्मादाय - न्यासः ।

यज्ञ-नारायण-दर्शनम्
प्रातः ८ तः ११
सायं ४.३० तः ५.३०
इतर-समये निषिद्धः प्रवेशः

संपादकः मुद्रकः प्रकाशकः स्वामी - पं. वसन्त अनन्त गाडगीळ, बी.ए.बी.एड्., साहित्य-विशारद (पुणे दूरवाणी - ५२१२४)
मुद्रण-स्थलम - शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुणे १६ मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१)
प्रकाशन-स्थलम् - श्रीशिव-समर्थ-मन्दिरम्, डेरवण (चिपळूण - रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६